No. ४५४६

Title सर्व प्रायश्चित्त विधिः

Author ×

Extent ५ Age ×

Subject धर्मशास्त्रं

सर्वप्रायश्चित्तविधिः

४५४७

त्कृतकायिकवाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतसकलपात
कातिपातकोपपातकलघुपातकसंकरीकरणमलिनीकरणापात्रीकरणजाति
भ्रंशाकरप्रकीर्णकपातकानांमध्येसंभावितानांमहापातकव्यतिरिक्तानांपात
कानांक्षयोनेनपर्षदुपदिष्टेनषडब्दाद्यन्यतमप्रायश्चित्तेनगोनिष्क्रयद्रव्यदानादि
प्रत्याम्नायद्वाराप्रायोदीव्यांगसहितेनाचीर्णेनतवैभविष्यतिनत्वंकृतार्थोभवि
ष्यसीत्युपदिशेद्भिः प्रत्याम्नायाश्चनिबंधेद्रष्टव्याः। ततोनिवेदितंप्रायश्चित्तं ॐ
भवद्भिर्यदुक्तंसंगीकृत्यसन्मानपूर्वंप्रणम्यपर्षदंविसृज्यास्मिंदिनेशक्तेनोप
वासः कार्यः इतरेणहविष्याशनं ततः कस्यांचित्तिथौकृतमाध्यान्हिकः सायाह्ने
केगंगादौदेशकालौसंकीर्त्यअमुकशर्मणोममजन्मप्रभृत्यद्ययावत्ज्ञानाज्ञानका
माकामसकृदसकृत्कृतकायिकवाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्टभुक्ताभु
क्तपीतापीतसकलपातकातिपातकोपपातकलघुपातकसंकरीकरणमलि

नीकरणापात्रीकरजातिभ्रंशकरप्रकीर्णकपातकानांमध्ये संभावितानांमहापातकव्य
तिरिक्तानांपापानांनिरासार्थंश्रीपरमेश्वरप्रीत्यर्थंवाषडब्दाद्यन्यतमप्रायश्चित्तांगा
निष्क्रयद्रव्यदानादिप्रत्याम्नायेनप्राच्योदीच्यांगसहितंयथाशक्तिकरिष्य इतिसं
कल्प्य।यानिकानिचपापानिब्रह्महत्यासमानिच।केशानाश्रित्यतिष्ठंतितस्मात्केशा
न्वपाम्यहमितिमंत्रेणाशिखाकक्षोपस्थवर्जंनखरोमाणिवापयित्वाप्राङ्मुखोद्वाद
शांगुलदंतकाष्ठेनअपामार्गादि।आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच।ब्रह्मप्रज्ञां
चमेधांचत्वंनोदेहिवनस्पते इतिमंत्रेणदंतान्संशोध्यस्नात्वाप्रायश्चित्तांगत्वेनभस्मस्ना
नंकरिष्ये इतिसंकल्प्यभस्मादाय ईशानायनमइतिशिरसितत्पुरुषायनमइतिमुखे
अघोरायनमइतिहृदिवामदेवायनमइतिगुह्ये सद्योजातायनमइतिपादयोः प्रणवे
नसर्वांगेयद्वा अग्निरितिभस्म।जलमितिभस्म।स्थलमितिभस्म।व्योमेतिभस्म।स
र्वंहवाइदंभस्मएवंस्नात्वासर्वप्रायश्चित्तांगतयागोमयस्नानंकरिष्ये।गंधद्वाराभि
त्तिंअग्रमग्रंचरंतीनामोषधीनांवनेवने।तासामृषभपत्नीनांपवित्रंकायशोधनं।त

न्मे रोगांश्च शोकांश्च नुद गोमय सर्वदे इति मंत्रेण वा गोमयेन स्नात्वा। सर्वप्रायश्चित्तांगत्वेन मृ
का स्नानं करिष्ये संकल्प्य भूमिं स्पृष्ट्वा इति भूमिं प्रार्थ्य मा बोरिष्ट खनिता इति खनित्वा स्योना पृथि
वीति मृदमादाय आयने ते नति दूर्वां गृहीत्वा गायत्र्याभ्युक्ष्य मृदं भूमौ निधाय मृदं कुशेन
भ्युद्दिक्षु क्षिपेत्। त्रातारमिंद्रमिति पूर्वस्यां यमाय सोमामिति दक्षिणतः। तत्त्वायामीति
पश्चिमतः। वयं सोम इत्युत्तरतः। तत्सूर्य रोदसी इत्युपरिष्टात्। अधः वश्यस्वेत्यधः। ततो
गेषु। सहस्रशीर्षेति शिरस्य। अक्षीभ्यां ते इति मुखे। ग्रीवाभ्य इति ग्रीवायां। आंत्रेभ्यस्त इति हृ
दये। नाभा नाभिमिति नाभौ। त्वमिंद्र सजोषस मिति वा कौ। सोमानं स्वरणमिति कक्ष्योः।
यः कुक्षिरिति कुक्ष्योः। बकीनां पिते तिपृष्ठे। ऊरुभ्यां त इत्यूर्वोः। मेहनाद्वनंकरणादिति
जान्वोः। एतावानस्येति पादयोः। यस्याविश्वानीति हस्तयोः। अंगादंगादिति पुरुषसूक्ते
न सर्वांगेषूद्वर्तनं एतावत्सर्वांगे। अश्वक्रांते रथक्रांते विष्णुक्रांते वसुंधरा। शिरसा धा
रयिष्यामि रक्षस्व मां पदे पदे। उद्धृतासि वराहेण कृष्णेन शतबाहुना। मृत्तिके हर मे
पापं यन्मया दुष्कृतं कृतं इत्यनेन वा। ततः सतिलदूर्वा मृदं शिरसि निधाय मृत्स्नानं

प्रक्षाल्य तीर्थं धारयेत्। हिरण्यशृंगं वरुणं प्रपद्ये तीर्थं मे देहि याचितः। यन्मया भुक्तमसाधू
नां पापेभ्यश्च प्रतिग्रहः। यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतं। तं न इन्द्रो वरुणो बृहस्प
तिः सविता च पुनन्तु पुनः पुनः। नमोऽग्नये ऽप्सुमते नम इन्द्राय नमो वरुणाय नमो वारु
ण्यै नमो मरुद्भ्यः। यदपां क्रूरं यदमेध्यं यदशान्तं तदपगच्छतात्। अत्याशनादतीपाना
द्यच्च उग्रात्प्रतिग्रहात्। तन्नो वरुणो राजा पाणिना ह्यवमर्शतु। सोहमपापो विरजो नि
2 र्मुक्तो मुक्तकिल्बिषः। नाकस्य पृष्ठमारुह्य गच्छेद् ब्रह्मसलोकतां। इमं मे गंगे॰ ऋक्॰ इदं
तेन्याभिरसमानमाद्रियाः का च सिंधुं प्रवहन्ति नद्यः। सर्पो जीर्णामिव त्वचं जहाति पा
पं स शिरस्कोऽभ्युपेत्य। तीक्ष्णदंष्ट्र॰ महर्सि। १ साम गरस्य च न निर्घोषदं हस्ताक्षुरांतक।
जगत्स्रष्टर्जगन्मर्दीन नमामि त्वां सुरेश्वर। प्रपद्ये वरुणं देवमंभसां पतिमूर्जितं। याचितं
देहि मे तीर्थं सर्वपापापनुत्तये ३ तीर्थमावाहयिष्यामि सर्वाघविनिषूदनं। सांनिध्य
मस्मिंस्तोये सुस्थीयतां मदनुग्रहात् ४ इमं मंत्रं समुच्चार्य तीर्थस्नानं समाचरेत्। अ

। करणजातिभ्रंशकरसंकीर्णकपातकानां मध्ये संभावितानां पातकानां निरासार्थमनु
ग्रहं कृत्वा प्रायश्चित्तमुपदिशंतु भवंतः तथा सर्वे धर्मविवेक्तारो गोप्तारः सकला द्विजाः।
मम देहस्य संशुद्धिं कुर्वंतु द्विजसत्तमाः। मया कृतं महाघोरं ज्ञातमज्ञातकिल्बिषं। प्र
सादः क्रियतां मह्यं शुभानुज्ञां प्रयच्छथ। पूज्यैः कृतपवित्रोऽहं भवेयं द्विजसत्तमैः। इति
प्रार्थ्य मामनुगृह्णंतु भवंत इति साष्टांगं प्रणमेत्। ततस्ते तमुत्थाप्य शरीरद्रव्याद्यश
क्तिमुत्तमादिपक्षांश्च विचार्य अस्मिन्पक्षे यं शक्त इति निश्चित्य पुस्तकवाचनपू
र्वकं कथयेयुरनुवादस्याग्रे [illegible] प्रसाम्नायांश्च कल्पयेयुः ततः प्रायश्चित्ती सर्व
प्रायश्चित्तांगत्वेन पुस्तकपूजां सभ्यानुवादकपूजां च करिष्ये इति संकल्प्य गंध
पुष्पादिभिः पूजयित्वा निबंधपूजानंतरं किंचिद्यथाशक्ति द्रव्यं निधाय अनुवाद
काय च पापानुसारेण शक्तितो रूप्यं दक्षिणां दत्वा कृतांजलिपुटो नत्रासित्वे वदेत्। ततोनु
वादकः अमुकशर्मणस्तेज अमुकस्य यावद्दशानाज्ञानकामाकामसकृदसकृ

॥ श्रीगणेशाय नमः। अथ सर्वप्रायश्चित्तं ॥ चतुरस्त्रीनेकं वाध्यालं विदं पर्षत्वेनोप
वेश्य कृतस्नानः शक्तो ससां क्लिन्नवासाः अनुंजानः हस्ते किंचिद्द्रव्यं गृहीत्वा पर्षदं
प्रदक्षिणीकृत्य हृदये हूयमानः धरण्यां साष्टांगं प्रणमेत्। ततस्तैः किं ते कार्यं वदास्मा
भिः किं वा मृगयसे द्विज। तत्र तोऽग्रं हितस्सर्वेस्ससंदिग्गतिरात्मनः। अस्माकं चैव सर्वे
3 षां सत्यमेव परं बलं। यदि चेद्रक्षसे सत्यं नियतं प्राप्स्यसे शुभं। यद्यागतोस्य स
सेन नत्वं गुप्यसि कांचिंचित्। इति पृष्टे पर्षदग्रे कर्ता करिष्यमाण सर्वप्रायश्चित्तां
गतया गोवृषनिष्क्रयीभूतं द्रव्यं पर्षदे दातुमहमुत्सृज्ये अनेन पापापहा महा
विष्णुः प्रीयतां ततः अमुकशर्मणो मे जन्मप्रभृत्य सद्य यावत् ज्ञानाज्ञान कामाकाम
सकृदसकृत् कृत कायिक वाचिक मानसिक सांसर्गिक स्पृष्टास्पृष्ट भुक्ताभुक्त पीतापी
त सकल पातकातिपातकोपपातक लघुपातक संकरीकरण मलिनीकरणापात्री

न्यथानत्कुलस्यार्धं तीर्थे शोकरति ध्रुवं पशरीरे जर्जरीभूते व्याधिग्रस्ते कलेवरे। औषधं जाह्न
वी तोयं वैद्यो नारायणो हरिः ६ पुष्कराद्यानि तीर्थानि गंगाद्याः सरितस्तथा। आगच्छंतु
पवित्राणि स्नानकाले सदा मम ।७। नंदिनी नलिनी सीता मालती च महापगा। विष्णुपाद
प्रसंभूता गंगा त्रिपथगामिनी। भागीरथी भोगवती जाह्नवी त्रिदशेश्वरी। द्वादशैतानि ना
मानि यत्र यत्र जलाशये। स्नानोद्यतः पठेद्यस्तु तत्र तत्र वसाम्यहं ९ गंगा गंगेति यो
ब्रूयाद्योजनानां शतैरपि। मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति १० ततः सुमित्रियान
आप ओषधयः संतु। दुर्मित्रियास्तस्मै संतु योस्मान्द्वेष्टि यं च वयं द्विष्मः। मा हं प्रजां परासि
चं या नः सयावरी स्थन। समुद्रे वो निनयानि स्वं पाथो अपीथ। समुद्रज्येष्ठेति च तस्र
भिः। नम रक्षसं दीति सूक्तेन पावमानीभिः। आपो हिष्ठेति तृचेन मार्जनं कृत्वा इमं मे गं
गे इत्युदकमालोड्य ऋतं चेति तृचं जपन्न घमर्षणं कृत्वा प्रवाहाभिमुखं त्रिर्मज्जेत् इ
ति मृत्तिकास्नानं। ततः आपो हिष्ठेति तृचेन शुद्धोदकेन स्नात्वा। सर्वपाय श्चित्तांगतया
पंचगव्यस्नानं करिष्ये। इति संकल्प्य गायत्र्या गोमूत्रेण गंधद्वारामिति गोमयेन आप्या

प्रा॰ यस्त्वेति क्षीरेण दधिक्राव्णा इति दध्ना घृतंमिमिक्ष इति घृतेन देवस्यत्वेति कुशोदकेन देवस्य त्वेति
मंत्र आभिषिंचामीति वाक्यशेषः स्त्रीशूद्राणाममंत्रकस्नानं एवं दशविधस्नानानि
विधाय स्नानांगतर्पणं कृत्वा धौते वाससी परिधाय द्विराचम्य अंगीकृतस्य प्रायश्चि
त्तांगत्वेन विष्णुश्राद्धं करिष्ये इति संकल्प्य शालिग्रामशिलायां विष्णुं श्वेतचंदनादिभिः सं
पूज्य आमचतुष्टयं निष्क्रयद्रव्यमामं वा यथानामगोत्रेभ्यो ब्राह्मणेभ्यो दातुमहमुत्सृ
५ जेऽनेन पापापहा महाविष्णुः प्रीयतां ततः प्रायश्चित्तांगत्वेन आद्यगोदानं गोनिष्क्रयं वा ब्रा
ह्मणाय दातुमहमुत्सृज्ये गवामंगेषु तिष्ठंति भुवनानि चतुर्दश। यस्मात्तस्माच्छिवं मे स्यादि
ह लोके परत्र चेति पठन्दद्यात् ततः सर्वप्रायश्चित्तांगत्वेन पापापहा महाविष्णुप्रीत्यर्थं व्याहृ
तिभिराज्यहोमं करिष्ये इति संकल्प्य स्थंडिलादि कृत्वा विट्नामाग्निं प्रतिष्ठाप्य ध्यात्वा
परिसमूहनादि कृत्वाग्नेरुदक् दर्भेषु स्रुवमाज्यपात्रं सामिधं चासाद्य प्रोक्ष्योत्तानी
कृत्वाज्यपात्रे पवित्रे निधायाज्यं प्रक्षिप्याधिज्य ज्वल्योत्पूय अग्नौ पवित्रे प्रक्षिप्याज्यपात्रं
पुरतः संस्थाप्य स्रुवं संमृज्याविश्यानि नइत्मभ्य च्यै समिधमाधाय व्यस्तसमस्तव्याहृ ४

त्रिभिरष्टोत्तरशतमष्टाविंशतिं वाज्याहुतीर्हुत्वा स्वाचांतत: ब्रह्मकूर्चहोमं करिष्य इति सं
कल्प्य सुवर्णताम्रपलाशान्यतमपात्रे ताम्रायाः गोमूत्रं त्रिपलं गायत्र्या प्रणवेन वादा
य अंगुष्ठार्धं परिमितं गोमयं श्वेतायाः गंधद्वारामित्यादाय कपिलायाः सप्तपलं पय
आप्यायस्वेत्यादाय नीलायाः सप्तपलं दधि दधिक्राव्ण इत्यादाय कृष्णायाः घृतमेकं पलं
घृतं मिमिक्ष इत्यादाय सप्तपलं कुशोदकं आपोहिष्ठेत्यादाय प्रणवेन यज्ञकाष्ठेनानिमं
ध्य प्रणवेनाभिमंत्र्य सप्तत्रैर्हरितैः कुशैः पलाशदले वा जुहुयादिमैर्मंत्रैः। ॐ इरावती
धेनुमती हि॰ भूः स्वः स्वाहा। पृथिव्या इदं न मम। इदं विष्णुर्वि॰ विष्णव इदं॰ मानस्तोके॰ रुद्रा
येदं॰ ब्रह्मजज्ञानं ब्रह्मण इदं॰ अग्नये स्वाहा अग्नय इदं॰ सोमाय स्वाहा। सोमायेदं॰ गायत्र्या
सूर्याय स्वाहा प्रणवेन प्रजापतये ॐ भूर्भुवः स्वः स्वाहा प्रजापतय इदं॰ अग्नये स्विष्टकृते
स्वाहा सर्वव्रतस्य कावतग्रहणं करिष्य इति द्विजान्स्पृष्ट्वा तैरनुज्ञातः प्रणवेन सर्वं पिबेत्
एतद्व्यामाहुर्निर्घातसीरे नक्षत्रदर्शने कार्यं अशक्तो गोमूत्रादिस्वल्पं यावत्सर्वं
स्यपेयत्वात्। आस्मिंदिने उपवासः शक्तस्येतरस्य हविष्याशनं इति पंचगव्यं प्राश्यम् ४

स॰भा॰ हे आगसाविष्णुं स्मर न्मौनी निशामृतिवाद्य देशकालौ निर्दिश्य पापापहम हाविष्णु प्रीत्यर्थं प्र
कीर्तनषडब्दां धन्यतम प्रायाश्चित्तस्य अशीत्युत्तर शतादि गोनि ष्क्रयीभूतं द्रव्यं नानाना
मगोत्रेभ्यो ब्राह्मणेभ्यो दातुमहमुत्सृज्ये अनेन पापापहाम हाविष्णुः प्रीयतां ॐ तत्स
त् तत उत्तरांगानि कुर्यात्। सर्वप्रायश्चित्तांगत्वेन व्याहृतिभिराज्य होमं करिष्ये इति संक
ल्प्य विलापितमाज्यं स्रुवेण पलाशपूर्णेन वा व्यस्तसमस्त व्याहृतिभिः अष्टोत्तरशतमष्टा
विंशतिं वाज्याहुती हुत्वा सर्वप्रायश्चित्तांगं विष्णुश्राद्धं करिष्ये संकल्प्य विष्णुं संपूज्य
विष्णुश्राद्धांगत्वेन आमचतुष्पर्यंतानि ष्क्रयद्रव्यं वा दातुमहमुत्सृज्ये दत्वा देशका
लौ संकीर्त्य सर्वप्रायश्चित्तांगत्वेन ब्राह्मणाय अंत्यगोदानं तन्नि ष्क्रयं वा दातुमहमु
त्सृज्ये अनेन पापापहा महाविष्णुः प्रीयतां विष्णवे कर्मार्पणं कृत्वा ब्राह्मणभोजनं
कुर्यात्॥ इति प्रायश्चित्तविधिः॥॥

५